HOME WORK CORRECTION SHEET FOR SEM - 6 SANSKRIT HONS

DEPARTMENT OF SANSKRIT

K.C.COLLEGE, HETAMPUR, BIRBHUM

DATE-9-6-2020

TOPIC--KARAKA AND TRANSLATION

PAPER-CC-14

সংক্ষিপ্ত প্রশ্নাবলী

১। করণে বিকল্পে কর্মসংজ্ঞাবিধায়কম্ সূত্রং কিম্? উদাহরণম্ প্রদীয়তাম্।

** করণে বিকল্পে কর্মসংজ্ঞাবিধায়কম্ সূত্রং-''দিবঃ কর্ম চ।'' দিবঃ সাধকতমং কারকং কর্মসংজ্ঞং স্যাৎ।

** যথা-অক্ষৈঃ অক্ষান্ বা দীব্যতি।

২। ''অপবর্গে তৃতীয়া'' সূত্রে 'অপবর্গ' শব্দস্য অর্থঃ কিম্?

** অপ-বৃজ্+ঘঞ্=অপবর্গঃ। অপবর্গঃ শব্দস্য অর্থঃ ফলপ্রাপ্তিঃ। ''অপবর্গঃ ফলপ্রাপ্তৌ সত্যাং ক্রিয়াসমাপ্তঃ ইতি কাশিকা''। অপবর্গঃ ফলপ্রাপ্তিঃ বা অর্থঃ দ্যোত্যে ব্যাপ্তার্থে তৃতীয়া স্যাৎ। যথা-ক্রোশেন অনুবাকঃ পঠতি। স মাসেন ব্যাকরণম্ অপঠৎ। অপবর্গে ন সতি ব্যাপ্তার্থে দ্বিতীয় স্যাৎ। যথা-মাসমধীতো নায়াতো।

৩। সহার্থে তৃতীয়া বিভক্তিঃ বিধায়কম্ সূত্রম্ কিম্? উদাহরণম্ প্রদীয়তাম্।

** সহার্থে তৃতীয়া বিধায়কম্ সূত্রম্-''সহযুক্তেঽপ্রধানে''।

** উদাহরণম্-পিত্রা সহ আগতঃ পুত্রঃ।

৪। বিনাপি তদ্যোগং তৃতীয়া -'বৃদ্ধো যূনা--' ইত্যাদি নির্দেশাৎ ব্যাখ্যা কার্যা।

** সহার্থেন যুক্তে অপ্রধানে তৃতীয়া স্যাৎ। যথা-পুত্রেণ সহ আগতঃ পিতা। ননু 'পুত্রেণ আগতঃ পিতা' ইত্যত্র সহাদিশব্দভাবাৎ কথং তৃতীয়া ইত্যত আহ-বিনাপীতি।

পাণিনিঃ তস্য 'বৃদ্ধো যূনা তল্লক্ষণাশ্চেৎ-' ইতি সূত্রে 'যুবন্' শব্দে তৃতীয়া বিভক্তিঃ প্রয়োগং কৃত্বা জ্ঞাপিতবান্ যৎ সহার্থকশব্দ অনুক্তে অপি তৃতীয়া বিভক্তিঃ স্যাৎ।

৫। অঙ্গবিকারে তৃতীয়া বিধায়কম্ সূত্রোল্লেখং কুরু। উদাহরণম্ প্রদীয়তাম্।

** অঙ্গবিকারে তৃতীয়া বিধায়কম্ সূত্রং-''যেনাঙ্গবিকারঃ''।

** উদাহরণম্- বালকঃ অক্ষ্ণা কাণঃ।

৬। ''যেনাঙ্গবিকারঃ'' সূত্রে অঙ্গবিকারঃ শব্দস্য অর্থঃ কিম্?

** ''যেনাঙ্গবিকারঃ'' সূত্রে অঙ্গবিকারঃ শব্দস্য অর্থঃ-অঙ্গমস্যাস্তীতি ''অর্শ আদিভ্যোঽচ্'' অঙ্গঃ অঙ্গবান্ পুরুষঃ; তস্য বিকারঃ ইতি অঙ্গবিকারঃ।

৭। উপলক্ষণে কা বিভক্তিঃ ভবতি? সূত্রোল্লেখং কুরু। উদাহরণম্ প্রদীয়তাম্।

** উপলক্ষণে তৃতীয়া স্যাৎ।

** সূত্রম্-''ইত্থম্ভূতলক্ষণে''।

** উদাহরণম্-জটাভিস্তাপসঃ। শিখয়া পরিব্রাজকঃ।

৮। ''ইত্থম্ভূতলক্ষণে'' সূত্রে 'ইত্থম্ভূত' শব্দস্য অর্থঃ কিম্? লক্ষণ শব্দস্য অর্থঃ কিম্ ?

** অয়ং প্রকারঃ ইত্থং, তং ভূতঃ প্রাপ্ত ইত্থংভূতঃ।অস্য অর্থঃ অবস্থান্তরপ্রাপ্তিঃ।

** লক্ষণশব্দস্য অর্থঃ পরিচায়কচিহ্নঃ।

৯। বিকল্পে কর্মণি তৃতীয়য়াঃ উদাহরণম্ প্রদীয়তাম্। সূত্রোল্লেখং কুরু।

** বিকল্পে কর্মণি তৃতীয়য়াঃ উদাহরণম্-**পিত্রা** পিতরং বা সংজানীতে। ইত্যত্র 'পিত্রা' ইতি পদে 'সম্' পূর্বকম্ 'জ্ঞা' ধাতোঃ কর্মণি বিকল্পে তৃতীয়া স্যাৎ।

** সূত্রম্-''সংজ্ঞোঽন্যতরস্যাং কর্মণি''।

১০। হেত্বর্থে কা বিভক্তি স্যাৎ ? সূত্রোল্লেখং কৃত্বা উদাহরণম্ প্রদীয়তাম্।

** হেত্বর্থে তৃতীয়া বিভক্তিঃ স্যাৎ। যথা-**দন্ডেন** ঘটঃ। ইত্যত্র 'দন্ডেন' পদে হেত্বর্থে তৃতীয়া বিভক্তিঃ ভবতি।

** সূত্রম্-''হেতৌ''।

সংস্কৃত ভাষায় অনুবাদঃ

১। বেদসমূহ পৃথিবীর প্রাচীনতম গ্রন্থ। ঐগুলি খুব সুন্দর ভাষায় রচিত। যে কেউ বেদ গান ও আবৃত্তি করতে পারে।

= বেদাঃ পৃথিব্যাঃ প্রাচীনতমাঃ গ্রন্থাঃ। অমী/তে অতীব সুন্দরয়া ভাষয়া রচিতাঃ। কো২পি জনঃ(সর্বে এব) বেদানাম্ গানম্ আবৃত্তিম্ চ কতুম্ শক্নোতি।

২। খাদ্য ছাড়া কোনো প্রাণী বাঁচতে পারে না। খাদ্য আমাদের বল দেয় এবং আমাদের জীবিত রাখে। কিন্তু মানুষ কেবলমাত্র খাদ্য নিয়েই বাঁচে।

খাদ্যং বিনা কো২পি প্রাণী জীবিতুম্ ন শক্নোতি। খাদ্যম্ অস্মভ্যম্ (সম্প্রদানে ৪র্থী) বলম্ দদাতি অস্মান্ জীবিতান্ চ রক্ষতি। কিন্তু নরঃ(মানবঃ) খাদ্যেন এব জীবতি।

৩। গত হয়েছে সংস্কৃতের সেই দিনগুলি। বর্তমানে এর জাঁকজমক অনুপস্থিত। কোথায় সেই বৈদিক যুগ আর কোথায় এই বর্তমান যুগ । যথাশীঘ্র এর সরলীকরণ প্রয়োজন।

=সংস্কৃতস্য তে দিবসাঃ গতাঃ। অধুনা অস্য আড়ম্বরঃ অনুপস্থিতঃ। ক্বঃ(কুত্র) সঃ বৈদিকঃ যুগঃ ক্বঃ(কুত্র) বা এষঃ বর্তমানঃ যুগঃ। যথাশীঘ্রম্ অস্য সরলীকরণম্ প্রয়োজনম্/আবশ্যকম্।

.....